## Śrītapovanaṣaṭkam

## श्रीतपोवनषट्कम्

व्याप्तं जगद्येन चिदात्मभावाद्   रज्ज्वा यथाऽहिर्हि चराचरं यत् ।
संन्यस्य सर्वं च सदात्मभावे  स्वयं समस्तं च बभूव यस्तु ॥
निस्सङ्गनिर्मुक्तिपदं प्रपद्य   ब्रह्मात्मभावेन विराजितो यः ।
श्री सौम्यकाशीशमहेश्वराय तस्मै नमः स्वामितपोवनाय ॥ १ ॥

**vyāptaṁ jagadyena cidātmabhāvād**
**rajjvā yathā'hirhi carācaraṁ yat |**
**sannyasya sarvaṁ ca sadātmabhāve**
**svayaṁ samastaṁ ca babhūva yastu ||**
**nissaṅganirmuktipadaṁ prapadya**
**brahmātmabhāvena virājito yaḥ|**
**Śrī Saumyakāśīśamaheśvarāya**
**tasmai namaḥ Svāmitapovanāya ||1||**

अखण्डभावः शिवरूपतत्वः  चितिस्वभावः परमात्मसत्यः ।
सत्यस्य सत्यः सुधियैव गम्यः  परः प्रधानात्परमेश्वरो यः ॥
आद्यन्तहीनो निरपेक्षदीप्तिः  स्वतः स्वरूपेण विफुल्लितो यः ।
श्री सौम्यकाशीशमहेश्वराय तस्मै नमः स्वामितपोवनाय ॥ २ ॥

**akhaṇḍabhāvaḥ Śivarūpatatvaḥ**
**citisvabhāvaḥ paramātmasatyaḥ |**
**satyasya satyaḥ sudhiyaiva gamyaḥ**
**paraḥ pradhānātparameśvaro yaḥ ||**
**ādyantahīno nirapekṣadīptiḥ**
**svataḥ svarūpeṇa viphullito yaḥ|**
**Śrī Saumyakāśīśamaheśvarāya**
**tasmai namaḥ Svāmitapovanāya ||2||**

मन्तुन्न शक्यो मनसा कदाचिद् वक्तुन्न केनापि तथा न वाचा ।
बोद्धुञ्च बुद्ध्यादि तथा न शक्यः बुद्ध्यादिसाक्षी खलु केवलो यः ॥
सर्वेन्द्रियातीतपदस्थितोऽपि सर्वेन्द्रियप्रेरयिता परो यः ।
श्री सौम्यकाशीशमहेश्वराय तस्मै नमः स्वामितपोवनाय ॥ ३ ॥

**mantunna śakyo manasā kadācit**
**vaktunna kenāpi tathā na vācā |**
**boddhuñca buddhyādi tathā na śakyaḥ**
**buddhyādisākṣī khalu kevalo yaḥ||**
**sarvendriyātītapadasthito'pi**
**sarvendriyaprerayitā paro yaḥ |**
**Śrī Saumyakāśīśamaheśvarāya**
**tasmai namaḥ Svāmitapovanāya ||3||**

शुद्धातिशुद्धश्च सदा प्रबुद्धः विश्वेश्वरो विश्वपरः प्रसन्नः ।
व्यापी परब्रह्मणि मोदमानः वेदान्तसारः सुधियां शरण्यः ॥
एको वशी सर्वभूताधिवासः सर्वाधिपः सर्वजीवात्मको यः ।
श्री सौम्यकाशीश महेश्वराय तस्मै नमः स्वामितपोवनाय ॥ ४ ॥

**śuddhātiśuddhañca sadā prabuddhaḥ**
**viśveśvaro viśvaparaḥ prasannaḥ |**
**vyāpī parabrahmaṇi modamānaḥ**
**vedāntasāraḥ sudhiyāṁ śaraṇyaḥ ||**
**eko vaśī sarvabhūtādhivāsaḥ**
**sarvādhipaḥ sarvajīvātmako yaḥ|**
**Śrī Saumyakāśīśamaheśvarāya**
**tasmai namaḥ Svāmitapovanāya ||4||**

अशब्दमस्पर्शमरूपवच्च तथारसं नित्यमगन्धवच्च ।
निरञ्जनं नित्यनिरीहमेकं बुद्धेः परं निर्गुणसद्ध्रुवञ्च ॥
गुह्यं गभीरं गगनोपमं यं पश्यन्ति निर्धूतमला यतीन्द्राः ।
श्री सौम्यकाशीशमहेश्वराय तस्मै नमः स्वामितपोवनाय ॥ ५ ॥

**aśabdamasparśamarūpavacca**
**tathārasaṁ nityamagandhavacca |**
**nirañjanaṁ nityanirīhamekaṁ**
**buddheḥ paraṁ nirguṇasaddhruvañca||**
**guhyaṁ gabhīraṁ gaganopamaṁ yaṁ**
**paśyanti nirdhūtamalā yatīndrāḥ |**
**Śrī Saumyakāśīśamaheśvarāya**
**tasmai namaḥ Svāmitapovanāya ||5||**

तेजोमयं दिव्यममेयशक्तिं सनातनं शान्तमनामयं च ।
अद्वैतमाश्चर्यमचिन्त्यरूपं परात्परं नित्यमनन्तमाद्यम् ॥
ज्ञानप्रकाशेन विशुद्धसत्वः यं पश्यति स्वात्मनि चिन्त्यमानम् ।
श्री सौम्यकाशीशमहेश्वराय तस्मै नमः स्वामितपोवनाय ॥ ६ ॥

**tejomayaṁ divyamameyaśaktiṁ**
**sanātanaṁ śāntamanāmayaṁ ca|**
**advaitamāścaryamacintyarūpaṁ**
**parātparaṁ nityamanantamādyam ||**
**jñānaprakāśena viśuddhasatvaḥ**
**yaṁ paśyati svātmani cintyamānam |**
**Śrī Saumyakāśīśamaheśvarāya**
**tasmai namaḥ Svāmitapovanāya ||6||**